# Shri Niladrinatha Vishnu Stuti

# श्रीनीलाद्रिनाथविष्णुस्तुतिः

## Document Information

Text title : Shri Niladrinatha Vishnu Stuti 03 17

File name : nIlAdrinAthaviShNustutiH.itx

Category : vishhnu, stuti

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 03-17

Latest update : August 14, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2021

*sanskritdocuments.org*

# श्रीनीलाद्रिनाथविष्णुस्तुतिः

रक्ताम्भोरुहदर्पभञ्जनमहासौन्दर्यनेत्रद्वयं
मुक्ताहारविलम्बिहेममकुटं रत्नोज्ज्वलत्कुण्डलम् ।
वर्षाम्भोदसमाननीलवपुषं अवेयहारान्वितं
शश्वञ्चक्रधरं प्रसन्नवदनं नीलाद्रिनाथं भजे ॥ १॥

नीलाद्रौ शङ्खमध्ये शतदलकमले रत्नसिंहासनस्थं
सर्वालङ्कारयुक्तं नवघनरुचिरं संयुतं जाग्रतेन चाग्रजेन ।
भद्रा यद्वामभागे रथचरणयुतं ब्रह्मरुद्रेन्द्रवन्धं
वेदानां सारमीशं स्वजनपरिवृत्तं ब्रह्मदारं स्मरामि ॥ २॥

उद्यन्नीरदनीलसुन्दरतनुं पूर्णेन्दुबिम्बाननं
राजीवोत्पलपत्रनेत्रयुगलं कारुण्यवारान्निधिम् ।
भक्तानां सकलार्तिनाशनकरं चिन्तार्तचिन्तामणि
वन्दे श्रीपुरुषोत्तम प्रतिनिधिं नीलाद्रिचूडामणिम् ॥ ३॥

फुलेन्दीवरलोचनं नवघनश्यामाभिरामाकृति
विश्वेशं कमलाविलोलविलसत्पादारविन्दद्वयम् ।
दैत्यारिं कमलेन्दुमण्डितमुखं शचक्राब्जहस्तद्वयं
वन्दे श्रीपुरुषोत्तम प्रतिनिधिं लक्ष्मीविलासालयम् ॥ ४॥

स्वपन रङ्गे जायद्यदुसरसि तिष्ठन् वृषगिरौ
प्रयागे सम्मज्जन्नथ बदरभूमीषु च जपन् ।
जगन्नाथे भुञ्जन् शतपदमयोध्यामधिवसन्
सदा द्वारावत्यां विहरति सलीलं यदुपतिः ॥ ५॥

कुन्दाभं द्विभुज त्रिभङ्गिललितं शान्तं जटाकुश्चित
स्तब्धोत्रमनिन्दितांसयुगलं पीताम्पर सुन्दरम् ।
ताश्वे च कटीतटे कुतकरद्वन्द्वं त्रिनेत्रस्थितं
सिंहाद्रौ शीघ्रपातक्षितिपिहितपदः पातु मां नारसिंहः ॥ ६॥

इति श्रीनीलाद्रिनाथ विष्णुस्तुतिः सम्पूर्णा ।

Proofread by Rajesh Thyagarajan

---

*Shri Niladrinatha Vishnu Stuti*

pdf was typeset on August 14, 2021

Please send corrections to *sanskrit@cheerful.com*